नं० ४८७८

नाम – पुरश्चरणकौमुदी

कर्त्ता – मुकुन्दपण्डितः माधवाचार्यनज्रपुत्रः

पत्र संख्या – ५८पत्राणि सं० ×

विषयः – तन्त्रम्

𑆥𑆶𑆫𑆯𑇀𑆖𑆫𑆟𑆑𑆿𑆩𑆶𑆢𑆵

𑇔𑇘𑇗𑇘

4878

P = 58

ॐ

॥ पुरश्चरणचंद्रिका ॥
कौमुदी

तंत्र

पत्र ५८

श्लो ११५०

तो

श्रीगणेशायनमः॥ ॥श्रीकृष्णचरणद्वंद्वमाधायहृदयांबुजे॥ क्रियतेकृष्णतोशायपुरश्चरणकौ-
मुदी॥ इहरवल्लु। पुरश्चरणसंपन्नोमंत्रोहिफलदायकः। किंहोमैःकिंजपैश्चैवकिंमंत्रन्यासविस्त-
रैः॥ रहस्यानांहिमंत्राणांयदिनस्यात्पुरस्क्रिया॥ पुरस्क्रियाहिमंत्राणांप्रधानंजीवमुच्यते॥ वी-
र्यहीनोयथादेहीसर्वकर्मसुनक्षमः। पुनश्चरणहीनोपितथामंत्रःप्रकीर्तितः॥ इतिवैशंपा-
यनेनपुरश्चरणस्यावश्यकत्वाभिधानात्तस्यच। निष्कामनिर्विघ्नसिद्धिनानाफलहेतुक-
र्मणां। इत्यविघ्यनुष्ठानेनिदाश्रनेतदनुष्ठानस्यापीत्यविचारेण। तत्रवायव्यसंहितायांसमाप्त
नंमूलमंत्रस्यपुरश्चरणमुच्यते। पु[illegible]नीयत्वाद्विनियोगारव्यकर्मणो। पुरतोविनियो-
गस्यचारणाद्वातथोदितः॥ तथामंत्रस्यप्रकाशो। धर्मार्थकाममोक्षेषुप्रासद्धमार्गणायोजनं।
सिद्धमंत्रस्यसंप्रोक्तोविनियोगोविचक्षणैः। पुनश्चरणपूर्वोसौविनियोगोविनिर्मितः। फल-

दशांततः दशांगोपासनं भक्त्या पुरश्चरणमुच्यते। इति वचनाद्दशांगं वदंति। एवं तु प्राशस्त्येनांगप
विधिरादरेण कार्यो विद्वद्भिः सकृत विधिर्निजेष्टसिध्यै। इति दीक्षाप्रकरणे विधायमध्ये पि तत्सत्याच
रणे प्रजाजपहोमानि वा स्वकामं वै सत्ह्देवताभिरपि जपध्यानहोमार्चनाभिः इत्युपसंहारे ज्ञापं कस
रकारैरभिधानात्। शारदातिलककृतापि सर्वत्र जपहोमावभिधाय प्रयोगाभिधानात्। नाजप
त्सिध्यते मंत्रो नाकृताश्च फलप्रदः। अनर्चिता हरेत्कामान् तस्मात्रितयमाचरेदिति कुलार्णवात
त्रवचनाच्च। पूजाजपहोमात्मकमेव पुरश्चरणमिति नच। यद्वा जपचतुर्थांशं होमं मंत्रमुच्चर
न्नु इति वैशंपायनवचनात्। वर्णलक्षं जपेन्मंत्रं मत्समहस्रं घृतप्लुतैः। पायसान्नैः प्रजुहुयादि
ति। शारदातिलकवचनात्। क्षेत्रांतरे जपस्या भागहोमेन सिध्यतीति दक्षिणामूर्तिकल्पव
चनादुक्तवचनाच्च। होमस्यानियतत्वात्। ततश्च नाभिधानं युक्तं। तदंगस्य तु सर्वत्र दशांगानि

राम ३

2

सिद्ध

यमंत्रसेवाथवानसेवायथातथा। चरणात्पूर्वमेवासो पुनश्चरणमुच्यते॥ एतेन विनियोगास्य
क्रमसामर्थ्यजनक्रिया ऐहिकामुष्मिकफलार्थं शुद्धहोमक्रियावापुरश्चरणमित्युक्तं। तथा कु
लप्रकाशतंत्रे। संसारे दुःखभूयिष्ठे यदि ह्येत्सिद्धिमात्मनः। पंचांगोपासनेनैव मंत्रजापात्सुखं भजे
त्। पूजात्रैकालिकी नित्यं जपस्तर्पणमेव च। होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते॥ इति
त्रैकेचिद्वचनं। तर्पणस्य दशांशेन न मोलं मन्त्रमुच्चरन्। अभिषिंचेत्स्वमूर्धानं जलैः कुंभसंख्यामुद्रया।
इति वैशंपायनवचनाच्च। पूजाजपहोमतर्पणमार्जनब्राह्मणभोजनात्मकं पुरश्चरणं वदंति के
परे तु। मूलमंत्राद्दशांशस्यादेगमंत्रजपादिकं। इति कपिलपंचरात्रवचनात्। जपहोमानांदशांशे
न कर्तव्यः। सिद्धिमुच्यतेति। वायवीयसंहितवचनाच्च। समांगं वदंति। अन्ये तु जपो होमस्तर्पणं च
स्वाभिषेकोघमर्षणं। सूर्यार्घ्यं जलपानं स्यात्प्रणामं देवपूजनं। ब्राह्मणानां भोजनं च सर्वं पूर्व

यमांनाभिधानमितिसांप्रतं। तर्पयेत्तद्दशांशेन समृतेन पयोधसा। कुर्यात्तद्दशांशतो होमं ततः सिद्धो
भवेन्मनुः। इति सनत्कुमारवचनात्। तर्पयेत्तद्दन्येषांमनुनाकुलसंख्यया। तर्पणोक्तिहितांनित्य
मितिवचनदुक्तवचनाच्च। तर्पणास्यानियतत्वेनाभिधानस्यचित्यात्। एवंजपहुतार्चाभिः सिद्ध
मंत्रेतुमंत्रिणइति। जपहुतपूजाभेदैरीतिसिद्धमंत्रजापिनोमंत्रे। इत्याचार्यवचनो जपहोमाव
पिधाय। एवंकृतेभवेन्मंत्री सिद्धिमंत्रःप्रतापवानिति। शारदातिलककीर्त्तौ पूर्वं याजपहोमेन
ततः सिध्यतिमंत्रराट्। इतिनारदपंचरात्रे। भगवत्तात्रिभिरेवसिध्याभिधानाच्च। अपिच। दक्षि
णामूर्तिसंहितायां। अर्कलक्षंजपेन्मंत्रंतद्दशांशेनहोमयेत्। पद्मैस्त्रिमधुमिश्रैस्तु पुरश्च
रीभवेत्ततः। एवंसंसिद्धिमंत्रस्तु सर्वसाम्राज्यदोभवेत्॥ ततोजपहोमानंतरं। पुरश्चारीकृत
पुरश्चरणोभवेदितिसंबंधः। तथा। लक्षत्रयंजपेन्मंत्री नियमेनजितेंद्रियः। तद्दशांशेनदेवेशि

3 किंशुके होमयेल्लक्षधीः। अनेन विधिना देवि पुरश्चारी भवेत्प्रिये। इत्यकाभ्यामेव पुरश्चरणाङ्गं वेदि
तव्यमिति। न च तर्पणादिविधायकवचनविरोध इति वाच्यं। तेषामेतद्विरोधेन युगान्तरपरत्वादि
ति क्रमः॥ ॥अथ जपनिर्णयः॥ ॥तत्र केचित्। यस्मिंश्च निगदेनैव मन्त्रसंख्या विधीयते। तत्र
सर्वत्र मन्त्राणां संख्यावृद्धिर्युगक्रमात्। कल्यौ केवलकेने संख्या त्रेतायां द्विगुणा भवेत्। द्वापरे त्रिगुणा
प्रोक्ता कलौ संख्या चतुर्गुणा। इति वैशम्पायनवचनात्। प्रजपेदुक्तसंख्यायाश्चतुर्गुणं जपं कलौ राम
विति। वचनाच्च। प्रपंचसाराद्युक्तजपचतुर्गुणितदशांशादिभिरेव पुरश्चरणानि विदन्ति। वस्तु ३
तस्तु नारदपंचरात्रादिदर्शनाच्चतुर्गुणमेव प्रपंचसाराद्युक्तजप इति तत्त्वं। यथा अष्टाक्षरस्य कृ
रणो। मार्गशीर्षस्य मासस्य त्रीण्यहान्येकमेव वा। उपोष्य शुक्लद्वादश्यामारभ्याष्टाक्षरं जपेत्।
अष्टलक्षमविघ्नेन पुरश्चरणकृद्द्विजः। शुक्लाचारः शुचिः स्नातो वाग्यतः संयतेन्द्रियः। मन्त्रसिद्धि

रदृष्टार्थाल्लक्षद्वयजपाद्भवेत्। ततो द्विद्विगुणाभ्यामादेहिक्यामुष्मिकी च मा। एवमेवात्मशुद्धिः स्या
दितावत्प्रथमे युगे। त्रेतायां द्विगुणा प्रोक्ता द्वापरे त्रिगुणास्तथा। चतुर्गुणाः कलौ प्रोक्ता इति शं
ख्लक्षणः। अदृष्टार्था आमुष्मिकी। ततो द्विगुणाभ्यामासा चतुर्लक्षजपादैहिकी। एतच्छरीर
भागदा। एवमेव त्रिलक्षद्वयादामुष्मिकी लक्षद्वयादैहिकीत्युक्तं। द्वात्रिंशल्लक्षमानेन सतुर्मंत्रज
पेत्पुनरित्याचार्यचरणैरप्युक्तं। तथा ज्ञानार्णवे। बाला प्रकरणे। वर्णलक्षं जपेन्मंत्रं सहस्रांशं हु
नेत्प्रिये। इत्यभिधाय न्यासपूजाधिकं सर्वं कुमार्यां एवमब्रवीत। इति भैरव्यामुद्दिष्टं लक्षद्वयं च
तुर्गुणा कल्याद्दीक्षां प्राप्य जपेन्मंत्रं तल्लक्षं जितेंद्रियः। इति तल्लक्षं। अतो द्वादशलक्षाणि।
वदंत्येके विपश्चित इति। प्रयोगसारवचनात्। इति भैरव्यामभिधाय बालायां तावत्। एषा बा
लेति विख्याता त्रैलोक्यवशकारिणी। पूजाजपादिकं सर्वं अस्याः पूर्ववदाचरेदिति। शारदानि

५

लकक्तो। इष्टं प्रपंचसारे भैरवीप्रकरणे। दीक्षां प्राप्य विशिष्टलक्षणयिजः सन्नसंप्रदायाद्योल्लमं
त्रमसुंज्वत सुनीयतस्तत्वार्धलक्षवशि। इति द्वादशलक्षमुक्तं तथा लक्षत्रयं जपेन्मंत्री इत्युक्ते
स्यात्रिपुटाजपस्य चतुर्गुणा एव जपइति विचिंत्य जपेद्यमंत्रमादित्यलक्षमिति। भानुलक्षं जपेदि
नमिति प्रपंचसारशारदातिलकयोरभिहितः। एतेन एकत्रनिर्णिनः शास्त्रार्थोऽन्यत्राभिप्रवर्ततेऽपि
बाधकमंतरेणेति स्यात सर्वत्रैव चतुर्गुणाभिधानमिति निरस्तिन चतरर्थसंख्यकं नापि सुद्राच ॥ राम
राजितेंद्रिय इत्यर्थे जपाभिधान्वारोधइति वाच्यं। उक्तनारदवचनेनास्यामुष्मिकसिद्धिवरस्त्वा ४
देहिकसिद्धिपरलोह्याविरोधाभावादिति सर्वमनवद्यं। अपर्यापर्यायस्तूमदीयसपर्याकल्प
ल्लतायामनुसंधेयः। होमपर्यायोवक्ष्यते। दं९ तद्दशांशको वा नारायणो यजपशांशस्य स्यात्सर्वत्र
इति। तन्निर्णयमाह। गौतमाहः। होमकर्मणपरशक्तानां द्विगुणो जपः। इतरेषां तु वर्णानां त्रि

मेरुतन्त्रे ॥ पञ्चधा तु विधिः प्रोक्तो जपसंख्याप्रकारकः ॥ आद्यः कल्पः प्रतिदिनमामध्याह्नं जपं चरेत् ॥ त
द्दशांशेन कल्पो न्यूने द्रव्ये होमं प्रकल्पयेत् ॥ तर्पणं मार्जनं कुर्यात्तथा ब्राह्मणभोजनम् ॥ तत्तद्दशांशतश्चाय प्रथ
मः कल्प ईरितः ॥ अथ द्वितीयकल्पस्तु लक्षमेकं जपं चरेत् ॥ होमादिकं तस्य कुर्यात्ततो अग्निमलक्षसमार

गुणाधिविधियाते । इति । तत्रैषां क्षत्रियवैश्यद्विजभक्तव्यतिरिक्तशूद्राणां द्विजभक्तानां शूद्राणां त
त्रितुल्यजपविधानात् । तथा कुंभसंभवः । यदि होमेन शक्तः स्यात्पूजा तर्पणं पि वा । तावत्सं
ख्यजपेनैव ब्राह्मणाराधनेन च । भवेदंगहृद्ययेनैव पुरश्चरणमार्यवैः । यद्यदंगं विधीयेत तत्सं
ख्याद्विगुणो जपः । कर्तव्यः सांगपीत्यर्थं तद्दशांशेन भक्तितः । तावत्संख्या[illegible]पुरश्च
रणे तेन प्रकृतजपद्विगुणलाभः न च होमद्विगुणजपः पूजायां संख्याभावेन तद्द्वैगुण्याभाव
त् । उक्तग्रंथविरोधाच्च । तद्दशांशेन द्विगुणजपा शांशेन जपाशक्तो न यद्यदंगं न संपद्यते तत्
त्संख्याद्विगुणो जपः कर्तव्य इति तथा मंत्रतंत्रप्रकाशे । असंभवे च होमस्य होमसंख्याद्विगुणो
जपः । इति । एतद्विप्रमात्रपरं । तदुक्तं कुलप्रकाशे । तत्रैव यद्यदंगं विहीयेत तत्संख्याद्विगुणो जपः
कुर्वन्त त्रिचतुःपंचसंख्यया साधकप्रिये । कुर्वन्त सांगसिध्यर्थं तद्दशांशेन भक्तितः । तेन शंभो

तथा कल्यायस्य देवस्य यत्प्रियं तदेव द्विगुणं का यैर्हीनं देवतातुष्टौ जपप्रियो सदाशिवो
होमप्रिया महादेवी ना रुद्रः तर्पणप्रियः । मार्जनं तु गणेशस्य विष्णोर्ब्राह्मणभोजनं ।

पु० को०

नां द्विजानां द्विगुणा द्विजपः। अत्र भक्तानां होम। संख्या द्विगुणा द्विजपः शूद्राणां तु पंचगुणा जपः। द्वि-
जभक्तानां तेषां स्त्रीणां च द्विगुणा द्विजपेनैव पुरश्चरणे। दक्षिणा च प्रदातव्या गुरोरिति द्विजन्मनो
भक्तियुक्तस्य शूद्रस्य दक्षिणा द्विगुणा भवेत्। स्त्रीणामपि तथा ज्ञेया भक्तस्यैव फलं भवेदिति। [illegible]
तमेन। विप्रभक्तस्य शूद्रस्य तत्स्त्रीणां ततो द्विगुणा दक्षिणा। [illegible] धानादेकं [illegible]
येन जपे। तपितथा। कल्पनादिति अभक्तानां तु होमसंख्या पंचगुणा जपः [illegible] तु होम [illegible] मल
क्तानां द्विजानां क्रमेण वेदरसनागगुणा जपः। नदाश्रितानां शूद्राणां [illegible] ५
कृतजपसंख्याः॥ ॥इति श्रीमाधवाचार्यविरचिते [illegible]
[illegible] को मुख्यः प्रयोगपरिच्छेदः प्रथमः॥ ॥अथेदानीं श्रमापाम [illegible] स्थपंच सो
समुद्रतीते ह्यथवाद्रिशृंगे समुद्रगानां सरितां च तीरे। जपेद्द्विविके निज एवं गेहे दक्षो [illegible]

पुरुषोमनुस्वी ।। तथा सनत्कुमारकल्पे । नद्याः समुद्रगामिन्या स्तीरे गोष्ठे तथा मुने । अश्वत्थबिल्व
मूले वा सिंधुतीरे जलाशये । पश्चिमाभिमुखे देवगृहे वा शैलमस्तके । प्रत्यक्पुरशिवस्थाने ह
षत्तेण विवर्जिते । इति कुंभसंभववचनादेकवाक्यात्तथा लोकस्य समीहितः तत्तेने । बिल्वछाय
समाश्रित्य मूले श्वत्थस्य वापि वा । गुरोर्वा संनिधौ गोष्ठे वृक्षस्थन्य शिवालये [illegible]
तुलसीकानने पि वा ।। अभीष्टदेवसान्निध्ये जपेन्मंत्रसमाहितः ।। नदीतीरे पुष्पनदीतीरे [illegible]
नदीतीरे निस्पृति निषिद्धलाभ ।। तथा कपिलपंचरात्रे क्षेत्रे तीर्थे वनारामे देवालये नदीतटे ।। [illegible]
टी विविक्त इत्येते देशाः स्युर्मंत्रसिद्धिदाः ।। नारदपंचरात्रे ।। गिरिगोष्ठे परिस्पंदे नद्यां [illegible]
दाः ।। देशाः पुण्या जपस्यैते यत्र वा जायते रुचिः ।। परिस्पंदप्रश्रवणोरण्यपुष्पवनोपादनेव न
मिति शारदातिलकवचनात् ।। वायवीयसंहितायां स्वर्गस्याग्नेर्गुरोरिदीपस्य ज्वलितस्य वा ।।

तथा च शिवगीतासु ॥ बिल्ववृक्षं समाश्रित्य यो मंत्रान् विधिना जपेत् । एकेन दिवसेनैव तत्पुरश्चरणं भवेत् ॥
यस्तु बिल्ववने नित्यं कुटीं कृत्वा वसेन्नरः ॥ सर्वमंत्राः प्रसिध्यंति जपमात्रेण पार्वति ॥ २ ॥

पु० कौ०

6

विप्राणां च गवां चैव सन्निधौ शस्यते जपः ॥ अथवा निवसेत्तत्र यत्र मे चित्तं प्रसीदति ॥ गृहे जपः स
मः प्रोक्तो गोष्ठे शतगुणस्मृतः ॥ आरामे च तथारण्ये सहस्रगुण उच्यते । अयुतं पर्वते पुण्ये नद्यां ल
क्षगुणस्मृतः ॥ कोटिर्देवालये प्राहुरनंतं मम सन्निधौ ॥ मम शिवस्य ॥ तथान्यत्र ॥ अनंतं विष्णुसन्नि
धौ ॥ तथा म्लेच्छदुष्टमृगव्यालाशंकातंकविवर्जिते । एकांते पावने निंदारहिते भक्तिसंयुते ॥ सु
शोधार्मिके राष्ट्रे सुभिक्षे निरुपद्रवे ॥ रम्ये भक्तजनस्थाने निवसेत्स्वरार्थ्ये ॥ राजन्वत्सभा यस्मि
पुरुषाः प्रभवो जनाः । चरंति येन मार्गेण न वसेत्तत्र तत्त्ववित् ॥ दीर्घि देवालयो [illegible] गृहे सनने पु
च ॥ न दिक्कूलादिकूलेषु मृच्छिद्रादिषु नावसेत् । न यद्विसामान्ये पुण्ये [illegible] ॥ त
था यामले ॥ पुण्यक्षेत्रादिकं गत्वा कुर्यात्सिद्धिपरिग्रहं ॥ तथान्यत्र ॥ मंत्रस्य पुरश्चरणसिद्धये ॥ म
यि यंत्रयते भूमिमंत्रो मे सिध्यतामिति ॥ भूमिं परिगृह्य कल्याणं [illegible] सर्वतो नंदिपर्वं नमी

तथा च गौतमीतंत्रे ॥ पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे । यदि कुर्यात्पुरश्चर्यां तत्र कूर्मं नि
चिंतयेत् । ग्रामे वा यदि वारण्ये गेहे वा तं च चिंतयेत् ॥

१५ यो दीपपरिमाणेन ग्रामो क्षेत्रमभिसंज्ञकं नगरे तद्द्वयं स्मृतं । शीरद्रोणं नार्कीकानुक्रमं ज्ञाति
मेकशीतान् ॥ निघंनिदशादिग्भागे तेषु स्वं नयमजये त् । क्षेत्रे चकीलिते मंत्री नवि घ्नः परिभूयते । क्षे
त्रपालादिकान् तत्र पूजयेद्विधिवत्ततः ॥ दिक्पतिभ्यो बलिं दत्वा ततः क्षेत्रं समाश्रयेत् ॥ क्षेत्रम
ध्यं समाश्रित्य कूर्मं चक्रं विचिंतयेत् । कूर्मचक्रमविज्ञाय यः कुर्याज्जपयज्ञकं तज्जपस्य फलं नास्ति
सर्वानर्थाय कल्पते । तथा शारदातिलके । चतुरस्रं भुवं भित्वा कोष्ठानां नवकं लिखेत् ॥ पूर्व
कोष्ठादि विलिखेत् सप्तवर्गाननुक्रमात् ॥ लक्ष्मीं तन्मध्यकोष्ठे स्वरान् प्रमक्रमाल्लिखेत् ॥ दिक्
पूर्वादितो यत्र ग्रामस्याद्याक्षरं भवेत् मुखं तत्स्य जानीयात्स्याद्भुज यत्तस्थितो । कोष्ठाद्भुजौ
करौ पादौ द्वौ शिष्टं पुच्छमीरितं । कूर्मे प्राणेनविभज्य मध्यस्थमपिभागतः मुखस्थो भवेत सिद्ध
करस्थ स्वल्पजीवनं । उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात् । पुच्छस्थः पीड्यते मंत्री बं

कूर्मचक्रमविज्ञाय यः कुर्याज्ज्ञान-
य शेधु ॥ तस्य चुरफलं नास्ति सर्वी
नर्थाय कल्प्यते ॥१॥

पु० को०

धनोच्चाटनादिभिः । कूर्मचक्रमिति ख्यातं मंत्रिणां सिद्धिसाधकं । चतुरश्रे द्विरेखे पूर्वापरायते
द्वे दक्षिणोत्तरायते च । तारश्च मध्ये कुर्यात् । एवं नवकोष्ठानि भवंति तेषु च क्षेत्रपालानवेतेषु
दीपेशानवकोष्ठके । मृत्तोवृषभः शैलराजो वा सकरर्थकृत् । शक्तिः पुनः पञ्चयोनि महाशंख
श्वेतेन वा । छायालक्षणमीहितं मध्यात्पूर्वादितो यजेत् । इति वचनादितेन वप्रज्याइ पूर्वकोष्ठा
दितः द्विकच्छ कोष्ठमारभ्य अष्टवर्गान् कचटतपयशाख्यान् अनुक्रमात् । मध्यात आरभ्य प्रतिको
ष्ठं लिखेदित्यर्थः । तदुक्तं पूर्वकोष्ठे कवर्गस्य पंचकं मध्यतः । क्रमात् मध्यतो नाक्रा चाग्नेये च
वर्गे चैवमेव ही तिः । मध्यकोष्ठे स्वरान्लिखेत् न पकारमायं । मध्यकोष्ठेषु रोगेषु अकार द्वयमालि
खेत् । आग्नेय्यामिह द्वयं विद्यात् याम्येतु द्वयमालिखेत् । नैर्ऋते च द्वयं विद्यात् [illegible] वारुणे तु द्वयं त
था । वायव्यामिह द्वयं विद्यात् सौम्यामिह द्वयमिष्यते । ईशे चा — [illegible] चारये दि

राम
७

7

ति। उभयतस्थितिकोष्ठिरिति प्रत्येकं हस्तकुक्षिपादे ष्वेति स्वल्पं ज्ञीवृ [illegible] अनेनेति ज्ञेय वनं भे
गः। तदुक्तं सुखस्थः सुखयुक्तो ज्ञेयः। कष्टस्थः स्वल्पसुखभागिनीति। सुखस्थ [illegible] सिद्धिः स्यात् कष्ट
स्थः स्वल्पसिद्धिकृत्। इतिवत् अत एवोक्तं। तस्मात्सुखसमाश्रित्य सर्वकार्यं समारभेत। तद्लाभे
कष्टेवापि कूर्मस्थानं समाश्रयेदिति। अथ वर्ज्यं यथा। स्थानसाधकयोर्नाम [illegible] रिपुस्थे चेदि
तात दक्षशास्त्रतो ज्ञात्वा तत्र सम्पर्कं परित्यजेत्। अस्तित्व महृदयस्योक्तं गकारणापरस्पर। एहृदय
स्य ठकारेण ठकारस्यापि तेन च। लहृदयस्य पकारेण पकारस्यापि लहृदयं। कहृदयस्य षकारेण
षकारस्यापि हृदयेन तु। ङकारस्य टकारेण ञकारस्य खकारतः। ङ उकारस्य तकारेण कंकारस्य यका
रतः। भकारस्य तु रेफेण यकारस्य सकारतः। अस्तित्वमेषां वर्णानां मन्त्रेषां मित्रभावना। कूर्मचक्रे
रिपुस्थानं साधको यानतत्त्यजेत्। यथा गर्गस्य वैरिस्याद् हृहासमहत्सुरा भयामरं श्वरस्येवमा

8

कारादिषु प्रयोजयेत् ॥ अनुभट्टढक्कारस्थं लुप्तकस्यारिपञ्चकं । ॐ डीयापणाषण्मुखस्य जन्हुं षड्गुपा दु० श्री०
कस्य चाष्टौ यन्तीटकपास्यारि खंडारं उझभट्टतनःडाकदेवस्य तेबानाथमोख्यं भंडिभट्टतनःभट्ट
स्यरन्ध्रकं वैरी यत्तु मित्रस्य वै शिरः । एवं क्रमेण संशोध्य वैरिस्थानं त्यजेन्नरः । श्रेत्रसाधकमेत्राणा
मेकमेवाद्यमक्षरं । यद्दिस्यात्मधकं वै मंत्रः सर्वसिद्धिफलप्रदः ॥ अनुशारदातिलके ॥ ॥ अथाक्ष
माला ॥ ॥ आदिक्षांतार्णयोगित्वा दक्षमालेति कीर्तिता । तद्वर्णसंख्यमणिभिर्जपमालां प्रक राम ८
ल्पयेत् । अकारादिक्षकारान्तवर्णानामाक्षमाला ॥ तदुक्तं ॥ ब्रह्मयामादिगतानां दीक्षान्तदर्पणेन्दि
भाव्य च । अंनों बिंदुयुक्तं कृत्वा सर्वं मंत्रं जपेत्सुधी ॥ अकारादिसंयोज्य तथकारादिमुखं क्रमात्
क्षार्णमेरुमथो तत्र कल्पयेज्जगदीश्वरि । तद्वालीमेभेद दक्षमालाथ जातसंख्यया । अनयासु
वै मंत्राणां जपः सर्वार्थसाधकः ॥ तथा ॥ अकारादिक्षकारान्तपंचाशद्वर्णरूपकं ॥ क्षकारं मेरुं

संस्थाने ळकारादि विलोमतः । वर्गाष्टक विभेदेन कालमष्टोत्तरं भवेत् । एवं क्रमेण तेन मंत्रं जपेद्देव फलप्रदं । इ
ति तथा । अनुलोमविलोमस्थ क्लृप्तया वर्णमालया । प्रत्येकं वर्णयुङ्मंत्रो जप्तव्यः सर्वसिद्धिदः । देवि मंत्र
अपि नृणां मन्त्रे मंत्राश्च किं पुनरिति । तेनान्यत्र क्षमाला पद्मपद्मयो गोमेदाश्च निबोद्धव्या । तथा पंचविंशति सि
मोक्षो त्रिंशद्भिर्धनसिद्धयः । सर्वार्थाः सप्तविंशत्या पंचदश्याभिचारकं । पंचाशद्भिः काम्यकर्मसिद्धिः स्याच्च
तुरुत्तरः । अष्टोत्तरशतैः सर्वसिद्धिरक्षैः कृता भवेत् । तथा । अष्टोत्तरशतैर्माला पंचाशच्चतुरस्त्रिंशत् सप्त
विंशति भिरक्षैः सर्वकामाधारणो जपः । इति तेन पुरश्चरणे पुरश्चरण जपे सप्तविंशत्या चतुःपंचाशता
साष्टशतेन माला कर्तव्या । तथा मंत्रतंत्रप्रकाशे । अंगुलीभिर्जपः संख्या जपमेकगुणं स्मृतं ॥ रेखया
ऽष्टगुणं विद्यात् अक्षैस्तु शतसंगुणं । तत्रांगुली जपं कुर्वन् सांगुष्ठांगुलिभिर्जपेत् । अंगुष्ठेन विना कर्म
कृतं तदफलं भवेत् । अंगुलीपर्वभिर्मंत्रजपं नित्यं प्रकल्पयेत् । तथा प्रपंचसारे । पद्मासनस्थो द्विजनो

प्रजापीतन्मानसस्तज्जपेनिवृत्तिनाभिः॥ अक्षस्रजावांगुल्याभिर्जपेद्यनातिद्रुतंनातिविलंबितं॥ एतेनपुर
श्चरणजपांगुलीभिर्नकर्तव्य इत्यापस्तं। पुरश्चरणंप्रक्रेत्यथांगुलीभिर्जपविधिः ... मारभेदि
ति नारदपंचरात्रेअभिधानाच्च॥ जपश्च। अनामिकामूलपर्वमारभ्यमध्यांगुलिमूलपर्यंतंकर्तव्य
इतितदुक्तं॥ भैरवतंत्रे॥ अनामामूलमारभ्यकनिष्ठादिक्रमेणतु। मध्यमामूलपर्यंतंकरमालाप्रकी
र्तिता। तथागौतमः। कनिष्ठानामिकांगुष्ठमध्यमाभिर्जपेत्सदा। इति॥ तथाशारदातिलके॥ रुद्राक्षमा
लिकास्तेनजपेत्सर्वमनोरथान्। पद्माक्षैर्विहितामालाशत्रूणांनाशनीमता। कुशग्रंथिमयीमाला
सर्वपापप्रणाशनी। पुत्रजीवफलैःक्लृप्ताकुरुतेपुत्रसंपदं। निर्मितारूप्यमणिभिः जपमालेप्सित
प्रदा। हिरण्मयीविरचितामालाकामान्प्रयच्छति। प्रवालैर्विहितामालाप्रयच्छेत्पुष्कलंधनं। सौ
भाग्येस्फाटिकीमालामौक्तिकैर्विहिताश्रियः। निर्मिताशंखमणिभिःकुरुतेकीर्तिमव्ययां। रु

वैरभिर्विरचिता माला स्यादनुक्रमेण नृणाम्। सर्वैरिति एकस्य पंचपंचाशिरिति एतेन रुद्राक्षीयद्विजप
ते रुद्राक्षस्फाटिकस्तथा। नान्यन्मध्ये प्रयोक्तव्यं पुत्रजीवादिकं क्वचित्। यद्यन्यद्गुप्तयुज्येत माला या
जपकर्मणि। तस्य कामं च मोक्षं च न ददाति प्रियंकरी। उन्मत्त रज्यते सर्ववेदवेदांगपारगः। मिश्रीभा
वततो ज्ञातु चण्डाले: पापकर्मभिः इत्युत्तरतंत्रवचनाद्देवीवरप्रियकरी त्वभिधानात्। इति एतद् व्या
तिरेकपरं। विषमपक्षे पण्णापरं वेति विज्ञेयं। तथा कुलार्णवे ध्यानरुद्राक्षेरनंतगुणितं फलं श्वेतपद्माक्ष
मालाभिरपि स्यादमितं फलं। तथा कुलार्णवे ध्याजपे हि ... सुवर्णमणिभिः ... पुत्रजीवैर्जपेदसप
पद्माक्षे: सर्व एव चेति। नारदवचनात्। गोपालस्य तु पद्माक्षमतीव प्रशस्तं। गौतमेन तस्मात् ...
नात्। यथा। समाहितमना भूत्वा पद्मबीजाक्षमालया। जपेदिति श्लोषः। नारदपंचरात्रे। जपस्य गण
नापाङ्कुः पद्माक्षे मौक्तिकवर्जने: इति भागवतोक्तत्वात् पक्वस्य रुद्राक्षेश्च नामामिति संग्रहवचनात्।

॥ नाक्षतैर्हस्तपर्वैर्वा न धान्यैर्न च पुष्पकैः॥ चंदनेर्मृत्तिकाया च जपसंख्यां न कारयेत्॥
लाक्षाकुशीतसिंदूरगोमयं च करीषकं॥ ... जपसंख्यां तु कारयेत्॥
नियमः पुरुषे ज्ञेयो योषित्सु च कदाचन॥ न न्यासो योषितां तत्र न ध्यानं न

वैष्णवानामपि रुद्राक्षमाला प्रशस्ता ॥ ॥ अथ संस्कारकालः ॥ ॥ तन्त्रयोगिनीतन्त्रे । द्वादश्यां वै स्वयं वीर
ला कर्तव्या साधकोत्तमैः । मन्त्रेणैव विष्णुमन्त्रेण दिवाभागे प्रयत्नतः । शक्तीनामपि कर्तव्या कृत्वा संस्कारं यथावि
धि । अष्टम्यां च नवम्यां वा चतुर्दश्यां तथैव च । त्रयोदश्यां तथा कुर्यात् शिवस्यापि महेश्वरि ॥ एतेनान्य
न्येषां तिथिनियमो नास्तीति प्रतीयते । संस्कारः योगिनीतन्त्रे । पट्टसूत्रकृता माला देव्याः प्रियकरी सदा ।
10 कार्पासैर्वैष्णवी माला पद्मसूत्रैरथापि वा । ऊर्णाभिर्वा कलेर्वापि शैवी माला प्रकीर्तिता । कार्पाससूत्रे १०
विशेषश्चोक्तः । ततो द्विजेन्द्र पुण्यस्त्री निर्मितं ग्रन्थिवर्जितं । त्रिगुणं त्रिगुणीकृत्य [illegible] प्रयत्नतः ।
पञ्चगव्येन गव्येश्च पञ्चभिस्तत्प्रक्षालयेदिति वचनात् । तथा एकतुल्यं विधा सा साधकाय धरेत्ल
यां । कृतनित्यक्रियः शुद्ध उत्तरेषु क्षेपुमन्त्रवित् । यथाकामं यथालाभं आशाम्या नीय यत्नतः । अन्योन्य
समरूपाणि नानि स्थूलकृशानि च । कीटादिभिरजुष्टानि न जीर्णानि नवानि च । गव्ये स्वपञ्चभिस्तानि

प्रक्षाल्य च पृथक् पृथक् । आदौ पूर्वदिने शालिक्यातिरिक्तमपरमेतत् । इति ज्ञेयं पंचगव्यं गोमूत्रं गोमयं क्षीरं
दधि सर्पिः कुशोदकं । पंचगव्यमिति प्रोक्तं महापातकनाशनं । इतश्चत्यक्तो तथा अश्वत्थपत्रनवकैः
यन्त्राकारेण कल्पयेत् । सूत्रं मणिं च गंधाद्भिः क्षालितां तत्र निक्षिपेत् । ...मंशालिमातृकां च मंत्रे चैव सम्पि तारं
ध्वथ । विन्यस्य पूजयेद्दाज्ये जुहुयाद्येव शान्तिकं । तारं प्रणवं । शक्तिं भुवनेश्वरीबीजं ह्रियामपि मे...
मादाय सूत्रे तत्र तु योजयेत् । तथा शैवागमे । गोपुच्छसदृशी कार्या एकश्रीवा समेरुका । उत्तरतन्त्रे । ए
को मेरुस्तत्र देयः सर्वेभ्यः स्थूलसंभवः । आद्यं स्थूलं ततस्तस्मात् न्यूनं न्यूनतरं तथा । विन्यसेत् क्रमतस्त
ध स्मात् सर्वाकाराच सारतः । ब्रह्मग्रंथियुतं कुर्यात् प्रतिबीजं यथाविधि । अथवा ग्रंथिरहितं हृदः ...
समन्विते । त्रिरावृत्यां तु मध्येनैवार्धावृत्यां तदेकतः । युक्तिः प्रदक्षिणावर्तः सर्वकार्येषु भिन्नः ...
क्षेत्रविशेषः । कालोत्तरोक्तः । एकवक्त्रैर्द्विवक्त्रैश्च चतुर्वक्त्रैश्च पंचभिः । षड्वक्त्रैर्वाथ कर्तव्या निश्चोनि

श्चवर्जयेत्। मुक्तमविमुखं तु कर्तव्यं मुखं मूले विवर्जयेत्। धात्रीफलप्रमाणेन श्रेष्ठमेतदुदाहृतं। बदर
उप्रमाणेन चणका मध्यमाधमे। नवचितनुना चैतद्धनीयमसंस्पृशात्। अघोरेणोद्धृतं तु मेदं
र्यं कर्तव्यं। तं नलं घयेत्। क्षालयेत्सद्योजातेन वामदेवेन घर्षयेत्। धूपं दद्यादघोरेण लिपेत्तत्पु
रुषेण तु। मंत्रयेत्पंचमेनैव प्रत्येकं तु शतं शतं। मेरुं च पंचमेनैव तथाघोरेणामंत्रयेत्। मुद्राष्टकं दर्श
यित्वा प्रत्येकं पूजयेत् क्रमात्। ग्रथितं पंचभिः पूज्यं पूर्ववच्च यथा शिवः। क्षालयेत्पंचगव्येन सद्यो राम
जातेन सज्जलैरिति वचनात्। घर्षयेच्चंदनागरुगंधाद्यैरित्युक्तेर्द्रव्यैर्लेपयेच्चंदनमृगनाभिकस्तू ११
रीकुंकुमादिभिरिति मुद्राष्टकं आवाहनादिभिरिति। अनंतरं पूजाविधानमिति अन्यमणिष्वप्य
यं संस्कार इति वदंति प्रकारांतरमाह। योगिनीतंत्रे। भूतशुद्ध्यादिकां पूजां समाप्य तत्तु पूजयेत्।
गणेशस्य विघ्नेशादुर्गाश्चावाह्य पूजयेत्। तंत्रमालायां। पंचगव्येन तत्क्षिप्त्वा होममंत्रेच

मंत्रवित्। तस्मादुत्कीलयतां मालां स्वर्णपात्रे निधाय च। पयोदधिघृतक्षौद्रशर्कराद्यैरसकृन्मात्वा
तोयधूपांतरैः कृत्वा पंचामृतविधिं बुधः। क्रमात्तन्नैव संस्थाप्य स्थापयेच्छीतले जले। ततश्चंद
नसौगंधिककस्तूरीकुंकुमादिभिः। तामालिप्य हसौ मंत्रमष्टोत्तरशतं जपेत्। तस्यां नवग्रहा
न्दिशाद्दिक्पालांश्च प्रपूजयेत्। ततः संपूज्य च गुरुं गृह्णीयान्मालिकां शुभां। तथा सेवीत ने।
आदौ गणपतिं देवं सूर्यं विष्णुमुमापतिं। दुर्गांश्च प्रपूजयेद्विद्वान् मालायां सुसमाहितः। पंचगव्ये
क्षिपेन्मालां प्रसादेनाभिमंत्रितां। ततस्तूत्कीलयतां मालां स्थापयेद्धिमपात्रके। पंचामृतेन सं
स्नाप्य शीतलेन जलेन च। चंदनेन सगंधेन कस्तूरीकुंकुमादिभिः। अभिषेकं ततः कृत्वा मंत्रे
णानेन मंत्रवित्। प्राणाञ्जीवसमारूढमोंकारस्वरभूषितं। बिंदुनादसमायुक्तं मंत्रराजं प्रविन्य
सेत्। नवग्रहान् प्रपूज्य पित्वा ततो दिक्पालपूजयेत्। तिलेन घृतयुक्तेन शक्तितो हि मयेन्नतः। स्वर्ण
ने

तुं दक्षिणां दद्यात् विप्रांस्तु तोषयेत्ततः । अनेन प्रासादेन विन्यसेद्दृष्टो तरग्रातकृत्वा प्राणोऽजीवः [illegible] ।
स्वर्णपात्राभावे अश्वत्थपत्रं ग्राह्यं । उक्तवचनात् । अन्यस्तु कुण्डिकान्तरे । शिल्पिनं पूजयेद्दत्वा वस्त्र
गंधानुलेपनैः । सहस्रं कारयेन्मालां विशुद्धः स्वर्णरूपिणीं । यथायोग्यां च शक्तितो मालां कुर्याद्विचक्ष
णः । चूर्णमानेन सा कार्या पंचगव्ये च ग्रहं क्षिपेत् । सूत्रं चापि चतुर्थेन प्रक्षालयेदस्त्रमंत्रकैः । समानव
12 र्णसूत्रेण ग्रथयेद्धृदयामुना । सुवर्णादिगुणैर्वापि ग्रथयेत्साधकोत्तमः । ब्रह्मग्रंथिं ततो दद्यात्तना
गपाशमथापि वा । कवचेनाच बध्नीयान्मालां ध्यानपरायणः । सर्वशोषीत तो मेरुं सूक्ष्म हृदयसमन्वि १२
तां ग्रथयेत्प्रणवयोगेन बध्नीयात्साधकोत्तमः । एवं निष्पाद्य देवेशि प्रतिष्ठां च समाचरेत् । स्थंडिले
मंडलं कृत्वा यथाभागविधिक्रमात् । पूजयित्वा यथान्यायमिष्टदेवमनुक्रमात् । न्यासपूर्वं जपेन्मंत्रं
अष्टोत्तरसहस्रकं । जुहुयाच्च दशांशेन यस्य देवस्य यत्प्रियं । ततो मंडलमध्ये तु तां मालां स्थापयेद्बु

धः। अस्त्रमंत्रं ततोन्यस्य मूलमंत्रं ततो न्यसेत्। ॐ मानीतानि विन्यस्य देवकलाभिर्विलेपयेत्। अघोरहृदयमाला
द्य मालां कुर्यात्तदात्मिकां। ततो बलिं यथान्यायं दद्यात्ते साधकोत्तमः। एवं प्रतिष्ठामापाद्य मालायामिष्ट
देवतां। आचार्यं पूजयेन्मंत्री श्रीलिंगिनं च यथाविधि। नान्यमंत्रं जपेत्तत्र यदीच्छेत्सिद्धिमात्मनः। अस्यादिन
न्यमंत्रस्य ग्राह्यः। बलिर्मालाया स्तेहि मद्यैः। अथान्तरतंत्रे। दृष्टेसूत्रे निपुंजीत जपेद्दृ ... सूत्रे
जीर्णसूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेदिति। शैवागमे। यथासंख्यं दृढे मालां ग्रथयित्वा समर्चयेत्। प्रति
ष्ठितायां मत्यां तु मंत्रं जपेदनन्यधीः॥ अथ विहितानि॥ नारदपंचरात्रे॥ ॥मनः संहननं मंत्रं मौनं म
न्त्रार्थचिंतनं। अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः॥ तथा॥ ॥तीर्थे मंत्रोपदेशश्च श्रद्धा च ...
मेपि। फलिष्यतीति विश्वास एतत्सिद्धेस्तु लक्षणं। श्रद्धा उत्साहः। त्रैलोक्यसंमोहनतंत्रे। ...
त्सर्यरहितः कामक्रोधविवर्जितः। सर्वदा लभते सिद्धिमन्यथा निष्फलं भवेत्। तथा ... ॥

कु॰ मै॰

13

नित्यनैमित्तिकं यद्य कुर्वीत तैर्वोथमोदितं। तदेव कर्म कुर्वीत तन्मनास्तत्परायणः। दांतस्त्रिषवणस्नायी मै
नी सन्मानितांतरः। पतेत वेश्मवं कर्म स्थिरधीर्नियतेंद्रियः। तथा गौतमः। स्वकर्मणि निरतस्य यतस्य सि
द्धिरदूरतः। दूरतोन्वितसिद्धिः स्यादिति तस्य द्विजोत्तमः। इतरस्य स्वधर्मरहितस्य दूरतोपि नि॰ कु
लेनापि न सिद्धिस्यादिति संभवः। तथा। क्रूरस्यापि न सिद्धिस्यादिति सत्यद्विजोत्तमः। तथा मैत्रायणे।
भूशय्या ब्रह्मचारित्वमौनं चर्या न सत्यता। नित्यं त्रिषवणस्नानं क्षुद्रकर्मविवर्जनं। नित्यपूजा नित्यदा राम
नं देवतास्तुतिकीर्तनं। नैमित्तिकार्चनं चैव विश्वासो गुरुदेवयोः। जपनिष्ठा ह्यादशैते धर्माः स्युर्मंत्र १२
सिद्धिदाः। ब्रह्मचर्यमष्टविधं मैथुननिवृत्तिः। तदुक्तं दक्षेण। स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभा
षणं। संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः। विपरीतं ब्र
ह्मचर्यमेतदेवाष्टलक्षणं। स्मरणात्कीर्तनप्रेक्षणानि अभिलाषपूर्वकानि केलिः परीहासादि बाह्य

चेष्टा। गुह्यभाषणं संभोगार्थं रहोमंत्रणं। संकल्पः मानसं कर्म अध्यवसायः संभोगं चेष्टा। त्रिषु वर्णास्त्रा
नं शक्तिविषये। स्नानं त्रिषु वर्णेषु प्रोक्तमशक्त्या हृदि वै रदिति। वेदव्यासं पायनस्मरणात्। क्षुद्रकर्मेदं मंदं षोत
थोन्मादस्तथोच्चाटभ्रममृमारणं। व्याधिश्चेति स्मृतं क्षुद्रं इति नारायणीयोक्तं। नित्यपूजात्मवं मेव जप
विधानात्। नैमित्तिकार्चनं अयनादौ विशेषपूजा। तदुक्तं मंत्रनेत्रप्रकाशे। अष्टोत्तरसहस्रं तु हुत्वा तत्पौर
मादरात्। जपेत्प्रतिदिनं यत्तु नित्य एष जपः स्मृतः। अयने विषुवे चैव ग्रहणे चेंदुसूर्ययोः। द्वादश्यां पूर्णि
मायां तु तेषु नैमित्तिको जपः। नित्यात्त्रिगुणितस्तेत्थ पूजा चैव हरेस्तथेति। एतथा कपिलपंचरात्रे। मंत्र
स्तदेवतानां तर तिथिवारे प्रयुज्य तामिति। तथा गौतमः। ततो गुरोः पादपद्मं पुष्पांजलिभिरर्चयेत्तत
स्मादाशीः सदाग्राह्यातत्तः संतोषमाचरेत्। संतुष्टे तु गुरौ देवः संतुष्टो नान्यथा भवेत्। तथागमरहस्यवचने।
संतुष्टो हि गुरुर्यस्य तस्य तुष्टं जगत्त्रयं। नास्त्यसाध्यं जगत्यत्र कृपया संन्ने गुरौ तु ने। हरिन्यसद्गुरोर्वाक्य

नक्तं दापि हि विकल्पयेत् । इति तथा कुंभसंभवः । स्नायाद्य पंचगव्येन केवलामलकेन च । अ॰ निस्मृति पुराणोक्त
मंत्रैः स्नायादनंतरं । अनुतिष्ठेदनुष्ठेयं शुचिस्तंतमानिशं । तथा वसिष्ठः । कृत्वा दैविदिक स्नानं नत्वा [illegible]
त्रिकमाचरेत् । इति तथा कपिलः । उपविश्य शुचौ देशे ततस्तर्पणमाचरेत् । विष्णुं चादेवता [illegible]
श्च मनुजानथ । तथा प्रपंचसारे । अथ हविष्याशी नक्ताशी वा जपेन्मंत्रांतरमिति वा [illegible] मनुः ।
14 तथा फेत्कारिणीतंत्रे । भैक्ष्यादी नियताहारः सकृद्रात्रौ विधीयते । दध्ना मूलफलैर्वापि कुर्याद्वा [illegible]
मन्वहमिति । रात्रौ दधिनिषेधाद्दिवाभोजनमिति केचिद्वदंति [illegible] तंत्रे । गुरुगोविप्रव
लेषु नदीनां धर्मरूपणो शुचाभवेदार्यमतिमैत्री न च द्रोहं समाचरेदिति । तथा गौतमः [illegible]
दा कार्यं गोषु शुश्रूषणं तथा । नित्यं गोषु प्रसन्नात्मा गोपालोपि प्रसादेति । तथा श्रीगोपालकल्पे । त
स्मात् होम्यः समभ्यर्च्य ग्रासं दद्यात्सुशोभनमिति ॥ । अथ निषिद्धानि । [illegible]

नेत्रे। नाप्रियं कस्यचिद्ब्रूयान्नानृतं वा कदाचन। न छायायामाक्रमेद्विद्वान् विभीतककरंजयोः। न कुर्यात्कस्यचि
त्किंचिन्न गृण्हीयाज्जपान्तरे। तैलाभ्यंगं न कुर्वीत न मधु मांसं विवर्जयेत्। स्त्रीषु संभाषणं नैव कुर्यात्कैर्वापि
मोहितः। न नग्नो न स्रग्गंधाढ्यो गीतवाद्ये विवर्जयेत्। विभीतककरंजयोरित्युपलक्षणं। विभीतकरंज
कास्तिक्ष्णिकायां नमं श्रयेदिति प्रयोगसारवचनात्। न गृण्हीयादिति सं तिसत्रवे असंभवे तद्दिने भक्षण
मात्रं ग्राह्यं। वक्ष्यमाणयुक्तेः। विमोहितः। कामपराशरः। तथा कुंभसंभवः। वाज्ञानः कर्मभिर्नित्यं नि
स्पृही वनितादिषु। स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणं। असत्यभाषणं जह्यात् भाषणं परिव
र्जयेत्। सत्यरपि न भाषेत जपहोमार्चनादिषु। वर्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनं। तांबूलं [illegible]
पंचपुष्पधारणमेव च। मैथुनं तत्कथालापं तद्गोष्ठिं परिवर्जयेत्। असंभाषणमत्यर्थं वर्जयेदस्य भोज
नं। कौटिल्यं क्षौरमभ्यंगमनिवेदितभोजनं। असंकल्पितकृत्यं च वर्जयेन्मर्दनादिकं। व्यजे दुष्टोदकं

स्नानं सुगंधामलकादिकं। सत्यैरित्यत्र प्रायश्चित्तमाह। नारदः। सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत्। प्रो
क्षेपामरशाद्वेऽपि प्राणायामं समाचरेत्। बकृपलापे चाचम्यो न्यासांगानि ततो जपेत्। क्षुते ष्ठीवने तथा स्प
स्तनानां स्पृशते तथेति। तथा योगयाज्ञवल्क्यः। यद्विवाप्यमलो मस्याज्जपादिषु कथंचन। व्याहरेद्वैष्ण
वं मंत्रं स्मरेद्वा विष्णुमव्ययं। इति। तथा वायव्यसंहितायां। पतितानामंत्यजानां दर्शने भाषणे स्मृते छि
15 तथो वायुगमने जृंभजे भये जपमुत्सृजेत्। प्राप्नावाचम्य चैतेषां प्राणायामं षडंगकं। कृत्वा सम्यग्जपेत्से राम
ऽपहास्यसूर्यादिदर्शनं। मार्जारकुक्कुटक्रौंचश्वानगृध्रखरकपीं। दृष्ट्वा चम्याचरेत्कर्म स्पृष्ट्वा स्नानं विधी १५
यते। एवमादींश्च नियमान्पुरश्चरणकृच्चरेदिति। तथा क्रोधमदं क्षुतं शिपो। निष्ठीवनविजृंभणादर्शन
स्वस्य नीचानां वर्जयेज्जपकर्मणि। आचामेत्संभवे चैषां स्मरेद्वा मां त्वया सह। ज्योतिषी चयपशेपह्वाकु
र्याद्वा प्राणसंयमं। मां महेशं त्वया पार्वत्या। तथा विष्णुधर्मोत्तरे। उपविष्टो जपेत्स्नातः स्वतपस्स्वच्छितादि

पु। पूजायां नाममन्त्रस्य सप्तवारान्प्रकीर्तयेत्। तथा फेत्कारिणीतंत्रे जपकाले दशावशेषे तु सिद्धि
त्रविन्नमः। प्राणायामं ततः कृत्वा ततः शेषं समापयेदिति। यदा चैवं भवेन्मंत्री स्वयमप्यशुचिर्नरः स्ना
त्वाचम्य यथापूर्वं न्यासं कृत्वा पुनर्जपेदिति। अत्र न्यासं अधिकारसंपादकं येन [illegible]
चित्तसंभवश्चतुः स्नानं। अन्यथा प्राणायाममषडंगकं विधाय शेषं समापयेदिति विज्ञायते तथा वै
शंपायनः। अस्नातस्य फलं नास्ति न चातर्पयतः पितॄन्। नायं तर्पयतो देवान्नासत्यमपि जल्पतो
नैकवासा जपेन्मंत्रं बहुवस्त्राकुलोऽपि वा। तथा योगिनीतंत्रे। अनास्थादिघ्नमत्यंतः म[illegible]मे
पि। कुलस्य संभावनाशक्तिः सिद्धिनाशाय निश्चितं। त्यजेदुष्टप्रवादं च परिवादं च वर्जयेत्। त्यजेदु
न संस्पर्शेद्दशकोटिभयं त्यजेत्। इति। तथा वायव्यसंहितायां। तुलसीषकं [illegible] मुक्त[illegible]
लावृतः। अपवित्रकरः शुद्धः प्रलपन्न जपेत्क्वचित्। असंवृतो करो कृत्वा शिरः संप्राप्तोऽपि वा।

चिंताद्याकुलचित्तोवा क्रुद्धोभ्रांतः क्षुधान्वितः। अनासनः शयानोवा गच्छन्नुत्थित एव वा॥ रथ्यायाम
१६ शिवस्थाने न जपेत्तिमिरांतरे। उपानद्गूढपादोवा यानशय्यागतस्तथा। प्र[illegible]यन जपे[illegible]
टासन एव वा। प्रमादादिना उत्तिष्ठति चेत्तदा हि। विक्षेपादथवालस्यात् जपहे[illegible] मार्जनादरे। [illegible]
दान्यासं षडंगं विन्यसेत्ततः इति। अपवित्रकरः पवित्रं कुशं विना दर्भैर्जाप्यत्कर्म विनास्ते [illegible]
राक्षसं तद्भवेत्सर्वं नेहामुत्रफलं भवेदिति कूर्मपुराणवचने। न तस्यावश्यकत्वा[illegible]
तथा नारदपंचरात्रे। अपवित्रकरो नग्नः शिरसि प्रावृतो [illegible] पिबा प्रलपन्वा न पेद्या[illegible]
लमाचरेत्। नग्नमाह [illegible]। नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्द्रपटस्तथा। नग्नश्च स्या[illegible] वस्त्रः स्यान्नग्न
स्निग्धपटस्तथा। विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च। तथा भविष्यत्पुराणे। विकच्छः कच्छशेषश्च
बहिः कच्छस्तथैव च। एककच्छः कच्छशून्यो नग्नः पंचविधः स्मृतः। तथा देवलः। [illegible] सा भवेद[illegible]

16

तथा चाश्वलायनः स्मृतौ । परिधाने सितं शस्तं वासः प्रावरणे तथा । पट्टकूलं यथालाभं ब्राह्मणस्य वि
धीयते ॥ अविकं त्रसरं चैव परिधाने परित्यजेत् । शस्तं प्रावरणे प्रोक्तं स्पर्शदोषो न हि द्वयोः ॥ भोजने च
मलोत्सर्गे कुरु तत्र समाचरेत् । प्रक्षाल्य त्रसरं शुद्धं दुकूलं सर्वदा शुचिः ।

नग्नः कौपीनवाससौ इति च । तथा कात्यायनः । दानमाचमनं होमं भोजनं देवतार्चनं । प्रौढपादो न कुर्वीत स्वा
ध्यायं देवतर्पणं । आसनारूढपादस्तु जानुनोर्जंघयोस्तथा । कृतावसक्थिको यस्तु प्रौढपादः स उच्यते ।
उच्चनीयमानभिधाय मंत्रं तं च प्रकाशयेत् । शक्तावेवं सर्वमेतद् अशक्तो शक्तितो जपेदिति । अथ जपः ॥ ॥
तत्र कुंभसंभवः । गुरोर्लब्धस्य मंत्रस्य शश्वदावर्तनं हि यत् । अंतरांगाश्च ... गाचन्यासपूर्वं जपः स्मृतः ।
अंगे सुतीक्ष्णसंबोधनं । अक्षराणामंतरावर्तनं जप इति । बंधः । तद्भेदमाह ... यवीयसंहितायां । जप
स्यांतरावृत्तिः स उच्चोपांशुमानसः । यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः । मंत्रमुच्चारयेद्वाचा जपयज्ञ
ः स वाचिकः । शनैरुच्चारयेन्मंत्रं ईषदोष्ठौ प्रचालयेत् । किंचिच्छ्रवणयोग्यः स्यात् उपांशुः स जपः स्मृतः ।
जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः । धिया यदक्षरश्रेण्या वर्णस्वरपदात्मिकां उच्चरेदर्थमुद्दिश्य
स उक्तो मानसो जपः । जिह्वाजपो मानसभेदः । उच्चैर्जपो विशिष्टः स्याद्यज्ञाद्दशगुणैर्युतः । उपांशुः स्या
च्छतगुणोत परिग्राह्य पद्मकं दश विधिस्सर्वदा ॥ वस्त्रमध्ये द्विकं दत्त्वा च वस्त्रं शूगं चतुर्थ्यं ॥ एवं क्रमे
ण बध्नीयात् लक्षणं श्रुतिचोदितं ॥ इति विद्यामित्र.

कु० कौ०

छतगुणः सहस्रो मानसः स्मृतः । तथा नारदपंचरात्रे । वाचिकः सर्वकार्येषु उपांशुः सर्वसिद्धिषु । मानसो मोक्ष
कार्येषु ध्यायेद्देवं च सर्वतः ॥ तथा महाभारते । सर्वेषामेव यज्ञानां जपयज्ञः प्रशस्यते । अहिंसया हि
भूतानां जायते सो महाफलः । जपनिष्ठो द्विजश्रेष्ठः सर्वयज्ञफलं भवेत् ॥ तथा श्रीभगवद्वचनं । यज्ञानां
जपयज्ञोस्मि तथा पद्मनाभीये । यावंतः कर्मयज्ञास्युः प्रदीप्तानि तपांसि च । सर्वे ते जपयज्ञस्य कलां ना
17 र्हंति षोडशीं ॥ जपेन देवता नित्यं स्तूयमाना प्रसीदति । प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिं च शाश्वतीं ॥ रा०
मनुसंहितायां । ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः । सर्वे ते जपयज्ञस्य कलां नार्हंति षोडशीं ॥ १०
अथासनं ॥ ॥ तत्र वैशंपायनः । सर्वसिध्यै व्याघ्रचर्म ज्ञानसिध्यै मृगाजिनं । वस्त्रासनं रोगहरं वेत्रजं
श्रीविवर्धनं । कौशेयं पौष्टिकं प्रोक्तं कांबलं दुःखमोचनं । वस्त्रमाविकं ॥ वस्त्रेतु कांबलश्रेष्ठं आसनं देव
तुष्टये । इत्युक्तरतंत्रवचनात् । कंबलं रक्तकाम्यार्थे । कंबलं चैवाभीष्टं [illegible] रक्तकंबलमिति वचनात् ॥ त

थावेत्रजंतालपत्रैश्चेति च। धर्मार्थकाममोक्षावाप्तिश्चैलाजिनकुशोत्तरे। अत एव कुशाजिनांबरैर्युक्तं चतु
रंगुलमूर्ध्वतः। चतुरस्रं द्विहस्तं च सुदृढं शुद्धं निर्मलं। आसनं कल्पयित्वा तु जपकर्म समारभेदित्युक्तो ना
रदेनेति॥ अथ निषिद्धः। वंशाश्मदारुधरणीतृणपल्लवनिर्मितं। वर्जयेदासनं मंत्री दारिद्र्यव्याधिदुः
खदं। नादीक्षितो विशेज्ज्ञानादुत्कृष्टसारा जिने गृही। विशेषाद्यतिर्वनस्थश्च ब्रह्मचारी च तत्स्मानदः इति॥
अथ जपपूर्वदिनकृत्यं॥ ॥त्रैलोक्यसंमोहनतंत्रे॥ शुभे मुहूर्ते नक्षत्रे शुद्धे काले यतव्रतः। गुरोरातो
समासाद्य ततः कर्म समाचरेत्। तथा सनत्कुमारकल्पे। अथ वक्ष्यामि मंत्रस्य पुरश्चरणमुत्तमं। कृता
भिषेको विधिवन्मंत्रं लब्ध्वा गुरोर्मुखात्। शुभे मुहूर्ते नक्षत्रे तिथौ स्नात्वा यथाविधि। विप्रान्संतर्प्य
यत्नेन भोजनाच्छादनादिभिः। भूवित्तवस्त्रभूषाद्यैः संतोष्य गुरुमात्मनः। संतोष्य गुरुमात[illegible]।
आरभेत जपं पश्चात्तदनुज्ञापुरःसरं। तथा प्रथमतंत्रे। क्षेत्रपालं च संपूज्य बलिं दद्याद्यथाविधि।

ति। वर्णांतिमो बिंदुयुक्तो क्षेत्रपालाय ह्रां नम इति पूजामंत्रः। बलिमंत्रश्च। पूर्वमेव हितं ह्रदयं यश्चादि
षी स्यात्पुरु ह्रयं। भंजपहितयं भयोनर्त्तयहितयं पुनः। ततो विघ्नपद ह्रं ह्रं महाभैरव तत्पर। क्षेत्रपा
लबलिं गृह्ण ह्रयं पावकसुंदरी। बलिमंत्रोयमाख्यातः सर्वकामफलप्रदः। तस्मै सपरिवाराय बलिं [illegible]ते
नचाहरेदिति। ततश्चोपवासः कर्त्तव्यः उत्तरवचनादिति॥ ॥अथ परदिने [illegible]
18
पिलपंरात्रे। एतन्नक्षत्रतिथ्यादौ करणे योगवासरे। मंत्रोपदेशो गुरुणा साधनं चा[illegible]शुभ[illegible]मेति।
दीक्षापुनश्चरणयोः समाननक्षत्रादिकं ज्ञेयं। तत्र नक्षत्राणि रत्नावल्यां। [illegible] रोहिण्य पुष्प
कं मृगशीर्षकं। हस्तस्वातीरनूराधा मघा मूलं च रेवती। अभिजिद्ध्रुवपांचेत्तित्था। उत्तरात्रय रोहिण्यो रे
वती पुण्यवासवं। धनिष्ठावायुमित्राश्विपित्र्यं त्वाष्ट्रं च मारुतं। ऐंद्रो वैश्व वह स्ताश्च दीक्षायां च शुभाव
हाः। वासवं ज्येष्ठं। वायु स्वाती। मित्रमनूराधा। अश्विनी। पित्र्यं मघा। त्वाष्ट्रं चित्रा। मरुतं मूलं। ऐंद्र

आर्द्रा। वैसम्वं श्रवणं तथा। पुष्यं च शतभिषक् चैवेति तथा। शिष्य त्रिजन्म नक्षत्रे विशाखा वाहस्ते

पुच। कुंभसंभवेनोक्ता। पूर्णिमा पंचमी चैव द्वितीया सप्तमी तथा। त्रयोदशी च दशमी प्रशस्ताः

सर्वकामदा। शुक्लपक्षे च कल्ये च दीक्षा सर्वसु भावहे दिति। कालोत्तरे भूमिकामैश्चिनेति स दर्तिसु

क्तिकामैः कृष्णपक्षेर तिच तथा। तत्रसारसंहितायां ब्रह्मा पाद्भूसाः पौर्णमास्युक्ता द्वादशी च ऊर्ध्वा

रिणः। चतुर्दशी शिवस्योक्ता वाच प्रोक्ता त्रयोदशी। द्वितीयानुश्रियः प्रोक्ता पार्वत्याः स्मृत तीयका।

चतुर्थी गणनाथस्य भानोः प्रोक्ता तु सप्तमी। तथा पंचरात्रे विष्णुदीक्षायां। द्वादश्यां शुक्लपक्षे च सत्य

संक्रमणे तथेति। मासाश्च कुंभसंभवेनोक्ता। मधुमासे भवेद् दुःखं माधवे रत्नसंचयः। मरणं भवति

ज्येष्ठे चाषाढे बंधुनाशनं। समृद्धिः श्रावणे नं भवेद्भाद्रपदे क्षयः। प्रजानामाश्विने मासि सर्वतः शुभ

मेव हि। ज्ञानं स्यात्कार्तिके सौख्यं मार्गशीर्षे भवत्यपि। पौषे तु ज्ञानक्षयो माघे भवेन्मेधा विवर्धनं॥

फाल्गुनेपिसमृद्धिःस्यान्मलमासंपरित्यजेत्।अत्रसारमासाग्राह्याः।सारेमासेकृतोद्वाहाविनिस्मरणात्॥क-
रणानि।रत्नावल्यां।शुभानिकरणान्याकृदीक्षायांचविशेषतः।शकुन्यादीनिविष्टिंचविशेषेणविवर्जयेत्।
आदिपदेच।किंस्तुघ्नचतुष्पदनागानांग्रहणं।योगाश्चतत्रैव।योगाश्चप्रीतिरायुष्मान्सौभाग्यःशोभनः
शुभः।सुकर्माधृतिर्वृद्धिर्ध्रुवःसिद्धिःसहर्षणः।वरीयांश्चशिवःसिद्धोब्राह्मोऐंद्रश्चषोडशेति।वासरा-
श्च।तत्रआदित्यमंगलसौरित्यक्त्वावारांश्चभृतये।इति।तत्रैवनिषिद्धानि।प्रतिपत्पूर्वाषाढार्धंचमीक-
त्रिकातथा।पूर्वभाद्रपदाषष्ठीदशमीरोहिणीतथा।द्वादश्याःसर्वनक्षत्रमर्यम्णाचत्रयोदशीनक्ष-
त्रलुंपाइत्येतेदेवानामपिनाशदाः।इति।सार्पनक्षत्रमाश्लेषाअर्यमोत्तरफल्गुनी।नीचस्थेवक्रसंस्थे
व्यतिचरणगणोनैबालवृद्धेस्तगेवासन्यासोदेवयात्राव्रतनियमविधिःकर्णवेधश्चदीक्षा।मौंजीब-
धोंगनानांपरिणयनविधिर्वास्तुदेवप्रतिष्ठावर्ज्याःसद्भिःप्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेच।

तथाश्वरः सर्वैर्विवर्ज्यस्यात्स्थिरराशिषु संस्थिता। त्रिषडायुगताः पापाः शुभाः केन्द्रे त्रिकोणगाः। दीक्षायां

तु शुभाः सर्वे रंध्रस्थाः सर्वनाशकाः। आयनेकादशस्थान पापाराहुकेतु क्षीण स्वपादाधिपतर णिधरणिर्थं

जरविज्ञाः पापयुतश्च मतः सोमस्य प्रथम चतुर्थ सप्तम दशस्थानानां केन्द्रसंज्ञा त्रिकोणस्थानानां नव पंचमं

शुभाः। पापोतरेरंध्रविद्धम ८ मस्थाने एवं विचार्य समीचीन समये ज्ञात्वारभेत्। नतु केंद्र स्विणाम्र्नि

कल्पो। साधयेत्प्रवरो विद्वान् पूर्वपक्षसमाश्रितः। पुण्यमुहूर्तेन क्षेत्रे तिथौ स्नात्वा यथाविधि नत्वा

गुरुंचविघ्नेशं नत्वा दुर्गां च मातरः। मातरं वंदनीयाइ इति शेषः। तथा कुत्र संभवः। बुधः संकल्पयकु बीज

पुरश्च श्यामाहरात्। तथा नारदीये। संकल्पं तु बुधः कुर्यात्स्वस्तिवाचनपूर्वकं। इति। तथा [illegible]। अभुक्त्वा

प्रातराहारं स्नात्वाचम्य समाहितः। सूर्यादि देवताभ्यश्च निवेद्य व्रतमाचरेदित्यन्वयः। व्रतं संकल्प्य निषेधो

नियतसंकल्पः। नतु क्वंकुत्र संभवेन। कर्तव्यस्य समस्तस्य नियमग्रहणं व्रतं। नियमव्यतिरेकेण सर्वं भव

तिनिषिध्यते। अभुक्त्वा आहारमिति एकवचनं प्राक् पूर्वदिने एकभुक्तं। कृत्वा तपोपवासः। शाकस्य एकभु
क्तं ज्ञेयं। सूर्यादिदेवताभ्यः सूर्यसोम इत्यादिना मत्स्यपुराणोक्तपर्यायेण निवेद्येत्यर्थः। तथा महाभारते।
गृहीत्वोदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयात् तथा संकल्पयेद् बुधः। उदुंबरं पात्रं उदङ्मु
ख इति नियमार्थं। संकल्पयेन्मनसा। नियमेदिति एतस्य भाव एवे निवहवः। तथा गोतमः। अंतर्जानु कृ
त्वा सलिलं सकुशोदकं। फलं समभिसंधायेदिति। तथा कुंभसंभवः। निष्ठा मासामनेनैव साक्षात्कारो	20 राम
भवेद्ध्रुवमिति। साक्षात्कार इष्टदेवदर्शनं। अनेन पुरश्चरणेनेति। अत्र यद्यपि मनसा संकल्पयति वा	२०
चा अभिलषति। कर्मणा चोपपादयतीति हारीतस्मरणात्। तस्माद्यत्पुरुषो मनसा गच्छति तद्वाचा व
दति तत्कर्मणा करोतीति श्रवणाच्च। मनसा[illegible]गतस्य वाचाभिलापे क्रियमाणे [illegible] मनसाधि
गतेनैनैतत्कर्म मनसा वाचाप्यभिलापः कर्तव्य इति भाव्यते। अतो अमुककामेन मया इदं कर्तव्या इति

फलत्वेयोल्लेख एव प्रतीयते तथापि। मासादिमप्युल्लेखः कर्तव्यः तथा ब्रह्मांडपुराणे। मासपक्षति
थीनां च सामान्येन च सर्वशः। उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेदिति। मासपक्षतिथीनां सर्व
शः। सर्वप्रकारेण सामान्यविषयभावेन तत्र सामान्येन मासपक्षतिथिपदे सविशेषतः। कार्त्तिकशुक्
प्रतिपदादिपदेन न दृश्यते च। इषेमास्यसिते पक्ष इत्यादि मुनीनां प्रयोगः। निमित्तानां देशकाल
दीनां सर्वप्रकारेण तत्र सामान्येन भारतवर्षपदेन तस्य सर्वकर्मफलं प्रतिहेतुत्वात्। तदुक्तं विष्णु
पुराणे। इतः संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयांति हि। तिर्यक्त्वं नारकत्वं च यांत्यतः पुरुषा मुने। न
खल्वन्यत्र कर्म मर्त्यानां कर्मभूमौ विधीयते। इति विशेषेण मधुराधिपतेन कालस्यापि सामान्यत।
अद्यत्यनेन विशेषतः सूर्योपरागादिपदेन न चैवं मासादीनां निमित्तानामुल्लेखद्वयप्रसंगः। संयो
गः पृथक्त्वन्यायेन सकृदुल्लेखस्योभयार्थत्वात्। उल्लेखनवचनप्रयोगमकुर्वतः फलभावश्रा

भिहितः। अथ एवं गारुडपुराणे। श्राद्धप्रकरणे। ॐ अद्यास्मिन्देशे अमुकमासि अमुकराशिगते स
वितरि अमुकपक्षे अमुकतिथावित्याद्यभिलापः। तथा अग्निपुराणे अद्य सोमार्कग्रहणे संक्रान्त्या
दौ सुतीर्थके इति। तथा। मकरस्थे रवौ माघे प्रातःकाले तथामले। गोष्पदेऽपि जले स्नानं स्वर्गदं प
पिनामपि। इति। पद्मपुराणे विधिवाक्ये मकरस्थे रवौ माघे गोविंदाच्युतमाधवेति। उक्तं एवमन्येष्व
21 पि विधिवाक्येषु श्रूयते। फलं चात्र मंत्रसिद्धिः। सकामानां तु वचनात् न च ऐहिकमंत्रसिद्धिः काम राम २१
इत्यभिलपनीयं। उक्तं नारदवचने नोभय सिद्धिः। पुरश्चरणफलत्वाभिधानादिति। तथा पू
जात्रैकालिकी नित्यं जपस्तर्पणमेव च। होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते इति। भक्तेश्च संभवे
न जपादीनामेव पुरश्चरणेनाभिधानात्। पुरश्चरणमहं करिष्ये इत्यभिलपनीयमिति। न च। पुरश्च
रणस्य चिरसमयसाध्यत्वेन अद्य अमुकतिथौ पुरश्चरणं करिष्ये इत्यनुपपन्नं स्यादिति। साम्प्रतं।

करिष्यइतिकृधातोःकृतिमात्रार्थत्वात्कामनायाःकृतिसमानाधिकरणत्वेनवर्तमानत्विथोयथाकया
चित्कृत्यासंपादितयानन्वन्तिथोक्तेननिर्वाहन्वयोरिपपत्तेरित्यास्तांविस्तारः। अष्टारभ्येत्विकेविहि
तिअतःपरंआशौचेपिनजपबाधः। नदुक्तंविष्णुना। यज्ञव्रतविवाहेषुश्राद्धेहोमार्चनेजपे। आरंभेसूतकं
नस्यादनारब्धेतुसूतकं। आरंभोवरणंयज्ञेसंकल्पोव्रतजापयोः। नांदीमुखंविवाहादौश्राद्धेपाक
परिक्रियेति। तथाचायवीयसंहितायां। एवमुक्तेविधानेनविलंबत्वरितंविना। उक्तसंख्याजपंकुर्या
त्पुरश्चरणसिद्धये। देवतागुरुमंत्राणां-- संभावयन्निधीया। जपेदेकमनाःप्रातःकालान्मध्यंदि
नावधि। यत्संख्ययासमारब्धंतत्कर्तव्यमहर्निशं। यदिन्यूनाधिकंकुर्याद्व्रतभ्रष्टोभवेन्नरः। प्रातःका
लादित्युक्तेः प्रातःस्नानोत्तरमेवजपारंभः। नचजपार्थंसूर्योदयानंतरंस्नानानंतरंकर्तव्यः। अरु
णोदयस्नानेनाधिकाराभावादितिसांप्रतं। संध्यात्रयेस्नानमात्रयमाद्विधानात्। नाजस्रेस्नाया

इति स्नानानंतरं निषेधस्मरणात् नारदपंचरात्रे। निशावसाने शयनात् स्मृत्वा नारायणं प्रभुं। उत्था
22 येत्यादिना शौचादि कर्माभिधाय। दंतकाष्ठं ततो भुक्त्वा स्नायात् तदनु नारदः। इति प्रातःस्नानं चाभि
धाय। संपूज्याथ जपं कुर्यादित्यत्र अरुणोदयस्नाने न कर्माधिकाराभावे बोधकवचनाभावाच्च
मध्याह्नेनावधीति अक्तो दिवा चैव जपं कुर्यात्। पौरश्चरणिको विधिरिति। फेत्कारणीतंत्रे। दिवाए
ताभिधानात्। जपं रात्रौ च वर्जयेदिति कुंभसंभवेन। रजनौ निषेधाच्च। देशकालाद्युपद्रव संभ राम
वनायां चतुर्थप्रहरस्य द्वितीयमुहूर्तपर्यंतं जप्तव्यं। चतुर्थस्य मुहूर्तस्य। राक्षसीनाम सा वै स्या २२
गर्हिता सर्वकर्मस्विति। मत्स्यपुराणे निंदितत्वात्। इति तथापि गलोमते। नध्यातो नार्चितो मंत्रः
सुसिद्धोपि प्रसीदति। न जप्तः सिद्धिदो मंत्रः नाहुतः फलदो भवेत्। पूजा ध्यानं जपो होमस्तस्मान्मं
त्रचतुष्टयं। प्रत्यहं साधकः कुर्यात् स्वयं चेत् सिद्धिमिच्छति। जपस्यांते शिवं ध्यायेत् ध्यानस्यांते पु

नर्जपेत्। जपध्यानसमायुक्तः शीघ्रं सिध्यति मंत्रवित्। होमस्याप्यशांतरमाह। नारदः। संख्यापूर्त्तौ नि
जेष्ट्ये जपसंख्यादशांशतः। यथोक्तकुंडे जुहुयात् यथाविधिसमाहितः। अथवा प्रत्यहं जप्त्वा
जुहुयात्तद्दशांशतः। अतश्च सपर्याध्यानजपानामेव प्रतिदिनमावश्यकता। तथा वैशंपायनसंहिता
यां। नैरंतर्यविधिः प्रोक्तो न दिनं व्यतिलंघयेत्। दिवसातिक्रमात्पुंसो मंत्रसिद्धिर्भवेन्न हि। यावत्सं
ख्यं जपेदह्नि पूर्वस्मिंस्तावदेव तु। दिनांतरेऽपि प्रजपेदन्यथा सिद्धिरोधकृत्। इति तथा गोतमः। ध्या
नार्चनजपानां च प्राणायामास्त्रयस्त्रयः। आद्यंतयोर्विधीयंते नासिकापुटचारिणः। करमूलाद्यंगुलं
च तंत्रप्रकाशे। अंगुलीर्न वियुंजीत किंचित्संकोचयेत्तलं। अंगुलीनां वियोगे तु छिद्रेषु स्रवते जपः। अ
न्यमालायां तावदुक्तं रुद्रतंत्रे। जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः। निधाय मंडलस्यांतः सर्वेहस्त
गतां चलां। इष्टमंत्रेण मालायाः प्रोक्षणं परिकीर्तितं। ॐ माले माले महामाये सर्वशक्तिस्वरूपिणि।

पु०दी० ८

23

चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव।पूजयित्वाततोमालांगृण्हीयाद्दक्षिणेकरे।बीजंगणायइति

पूर्वमुच्चार्यतदनंतरं।अविघ्नंकुरुमालेत्वंगृण्हीयादित्यनेनच।मंडलस्योंतंनिधायसव्यहस्तगता

मभ्युक्ष्यपूजयेदितिसंबंधः।पूजायांमंत्रमाह।ॐमालेमालेइत्यादि।तथाजपंसमारभेत्।पश्चात्स्व

वेध्यानमास्थितः।हस्तेनस्वतमादायचिंतयेन्मनसाशिवां।चिंतइत्वागुरुंमूर्ध्नियथावर्णादिकुंभ

वेत्।मंत्रंचकंठतोध्यात्वापीतवर्णांहिरण्मयीं।महामायांचहृदयेआत्मानंगुरुपादयोः।आज्ञाचक्रे

ततःपश्चात्गुरोर्मंत्रस्यचात्मनः।विलंबयेन्मूलमंत्रेणचादिषोडशचक्रकं।आदिषोडशचक्रस्थां

साधकानंददायिनीं।चिंतयेत्साधकोदेवींजपकर्मसमारभेत्।भ्रुवोस्मरिनाडीनांत्रयाणांशात

रुच्यते।तत्स्यांतंत्रिपदस्थानंषट्कोणंचतुरंगुलं।रक्तंचकुलयोगस्तेराज्ञाचक्रमितीर्यते।कं

ठत्रयाणांनाडीनांवेष्टनेविद्यतेनृणां।सुषुम्नेलापिंगलानांषट्कोणंतत्षडंगुलं।तत्स्वद्दृचक्रमि

राम

१२

तिप्रोक्तं कंठास्य मध्यगं । त्रयाणामथ नाडीनां हृदये चैकतां भवेत् । तत्स्थानं षोडशारं स्यात्समांगुल
प्रमाणतः । तत्वे तदुक्तं योगज्ञै रादि षोडश चक्रकं । ध्येयानाममंत्राणां चिंतनस्य जपस्य च । यस्मा
दाद्यं तु हृदयं तस्मादादीति कथ्यते । पश्चात्प्रणवोच्चारणात् । तदुक्तमत्रैव । निःसेतु च यथा तोयं
क्षणं निम्नं प्रसर्पति । मंत्रस्तथैव निःसेतुः क्षणात्क्षरति यज्वनां । तस्मात्सर्वत्र मंत्रेषु चादौ तु वर्णाद्विना
नयः । पार्श्वयोः सेतुमादाय जपकर्म समारभेत् । मंत्राणां प्रणवः सेतुस्तत्सेतुः प्रणवः स्मृतः । तथा का
लिकापुराणे । चतुर्दशस्वरो योसौ ह्येष ओंकारसंज्ञिकः । स चानुस्वारच — भ्यां मंत्राणां सेतुरुच्यते ।
इति अत्र शिवादि पदस्तुपलक्षणं । सर्वपूजानुसंगमिति स्वयमभिधानात् । तथा पूजयित्वा ततो मा
लां गृह्णीयाद्दक्षिणे करे । मध्यमायां मध्यभागे वर्जयित्वा तु तर्जनीं । अनामिकाकनिष्ठाभ्यां यु
तायां नस्प्रभावतः । तापयित्वा तत्र मालामंगुष्ठाग्रेण तद्धृतं । प्रत्येकं बीजमादाय अ[illegible]ध्वेन भैरव ।

स्ता ।

पु०को०

25

प्रतिवारं पठेन्मंत्रं शनैरोष्ठं न चालयेत्। मालाबीजं नु जमध्यं स्पृशेन्न हि परस्परं। पूर्वं जपप्रयुक्तेनां
नांगुष्ठाग्रेण मेरवः। पूर्वबीजं जपन्यस्य परबीजं च संस्पृशेत्। अंगुष्ठेन भवेत्तस्य निष्फलः स जपः
स्मृतः। मालां स्वहृदयान्यसेत् कलाद् क्षिप्रपाणिना। देवीं विचिंतयज्जप्यं कुर्याद्धामेन संस्पृशेत्॥
इत्युक्तं विवृणोति पूर्वेति। अत्र निंदामाह। पूर्वबीजमिति। तथा शैवागमे। तर्जन्या न स्पृशेत्सूत्रं कं
पयेन्न विधूनयेत्। न स्पृशेद्वामहस्तेन करभ्रष्टं न कारयेत्। अक्षाणां चालनेंगुष्ठेनान्यमक्षं न सं
स्पृशेत्। जपकाले सदा विद्वान् मेरुं नैव विलंघयेत्। परिवर्तनकाले च संस्पृष्टं नैव कारयेत्। कलिं राम
कटकटाशब्दं डोलमानेचलन्मतिः। चलिते चैव विद्वेषः स्फुटिते व्याधिसंभवः। हस्तात्च्युते महावि २४
घ्नं सूत्रच्छेदे विनश्यति। चलिते मध्यमायांगं अंगुल्यंतरगते मणिः सूत्रगुणच्छेदेदित्यर्थः। तथा। कास
क्षुते तु कुर्यात् प्राणायाममेकमावर्तनं त्यजेत्। प्रमादात्तर्जनीस्पर्शो भवेदावर्तनं त्यजेत्। जपनिषिद्धसंस्पर्शे क्ष

ल यित्वा पुनर्जपेत् ॥ अथ योगिनीतंत्रे ॥ सर्वासामपि च मालानां मेरुपार्श्वे विधीयते ॥ न स्पृशेत्तं कदाचित्तु स्पृष्टे

~ क्षालनं पुनः ॥ तथा कपिलपंचरात्रे ॥ एकचित्तः प्रशांतात्मा हस्तसूक्ष्मकरः शुचिः ॥ मुखस्थो वीन्त्रतः श्रां

तः कंपोन्मीलनवर्जितः ॥ सविसर्गं समंत्रं च सबिंदुं साक्षरं स्फुटं ॥ न द्रुतं नातिविश्रांतं क्रमान्मंत्रं जपेत्सु

धीः ॥ नारदपंचरात्रे ॥ अक्षरादक्षरं यावत् सर्वदोषेण वर्जितं ॥ विलंबितं च नातीव तथा स्पष्टपदोद्भवं ॥ रिक्त

विक्षेपरहितं मत्य(?) लक्ष्यधियान्वितं ॥ एवं कृत्वा जपं विप्रः विनिवेद्यः स योगवित् ॥ तथा योगिनीतंत्रे ॥ अष्टो

त्तरशतं वापि जप्त्वांते शिरसि क्षिपेत् ॥ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शिवं कुरुष्व मे भद्रे यशो

वीर्यं च सर्वदा ॥ पुष्कराक्षिशिखिबीजस्थं सूक्ष्मसूक्ष्मान्वितं भवेत् ॥ आकाशराशिसंयुक्तं शिरोहृदयसंयु

तं ॥ एष पंचाक्षरो मंत्रो मालायाः परिकीर्तितः ॥ ग्रहणे स्थापने चैव पूजने विनियोजयेत् ॥ पुष्करं हकारः ॥

शिखी रेफः ॥ सूक्ष्मसूक्ष्मं ईकारः हृदयं ॥ आकाशराशिभ्यां बिंदुर्धचंद्राभ्यां युक्तं हृदयं नमः ॥ फेत्कारि

लाक्षाकुसीतसिंदूरगोमयंचकरीपर्णं आलोड्य गुटिकां कृत्वा अपस्मारं व्याउ कारयेत्।

पीतं वै। यथाशक्तिजपं कृत्वा प्राणायामत्रयं चरेत्। नारदपंचरात्रे। जपं तद्नु कुर्वीत यथाशक्त्या युता
दिकां निवेदयेद्द्विजो स्तुत्वा वा कर्ममनसान्वितां ॐ पुंडरीकाक्ष विश्वात्मन् मंत्रमूर्ते जनार्दन। गृहाणमज्ज
पं नाथ मम दीनस्य शाश्वत इत्युक्त्वार्घ्योदकं पुष्पं कृत्वा दक्षिणपाणिना। अग्रतो निक्षिपेद्द्विजो मूलम
न्त्रेण नारद। मंत्रात्मा भगवान् विष्णुर्विचिरात्सिद्धिदो भवेत्। तथा शिवादौ धाहसो मन्त्रं भु। मानसो यो श्रु
भाष्याणां कुर्यादिकत मंजप। मूलस्याष्टशतं जप्त्वा न द्रुतं न विलंबितं। गुह्यातिगुह्यगोप्ता त्वं गृहाणास्म
25 त्कृतं जपं। सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थिते। भोगी श्लोकं पठित्वा तु दक्षहस्तेन शंभवे। मूलमं राम
त्रार्घ्यतोयेन परहस्ते निवेदयेत्। इति तथा नारदपंचरात्रे। संभपूज्याथ जपं कुर्याद्यावद् प्रहरद्वयं। २५
तदूर्ध्वं पूर्ववत्स्नात्वा विशेषेण विधानवित्। न्यासावसानमखिलं कर्म कुर्यात्पुरोदितं। पूजाग्निहोम
पर्यंतं ततश्च जपमारभेत्। यावद्दिनावसानं तु भूयस्नात्वा ततो द्विजः। उपास्य पूर्ववत्संध्यां देवं संपूज

येत्पुनः। विसर्ज्य भोजयेन्नं कुर्यात्सततं तारकोदये। संध्यामुपास्य देवं पूर्ववद्यजेदिति संबंधः। तेनन्यासा
दिकं सर्वं त्रिसंध्यं कर्तव्यमिति। सायंसंध्यावंदनोत्तरमेव तत्कालीन सपर्येति चाभिहितमिति।। अथ भो
ज्यानि। त्रैलोक्यसंमोहनतंत्रे।। भिक्षाशी वा हविष्याशी शाकमूलफलाशनः। पयोव्रती वा नियतो जप
देकाग्रमानसः।। भिक्षास्वरूपमाह कुंभसंभवः। वैदिकाचारयुक्तानां शुचीनां श्रीमतां सतां। सत्कुलस्था
नजातीनां भिक्षाशी चाग्रजन्मनां। इति तथा नारदः। चरुमूलफलक्षीरदधिभिक्षान्नसक्तवः। एतत्सम
विधं प्रोक्तं पवित्रं व्रतिभोजनं। मूलादिकं विहितमेव। तथा कपिलः। याविधवा ग्रशाकं च पयोपदं ह
वहतपद्या। विष्यकं पूर्वपूर्वं प्रशस्तं स्यादशनं मंत्रसाधने। हविरुक्तं भकुंभसंभवेन। सितैक विधहैमंतं मुन्यन्नं वै यसंस्मृतं। सै स्वीय सं चित
अश्वशालित वक्षामनुत्कोल्यहर्तयत। दधिक्षीरं घृतं गव्यमैक्षवं गुडवर्जितं। तिलाश्चैव सिता मुद्गाः कंदं केमुक
वर्जितं। नारिकेलफलं चैव कदलीलवलीतथा। आम्रमामलकं चैव पनसं च हरीतकी। व्रतांतरप्रशस्तं॥

हि ल

26

हविष्यं मनुते बुधः। अवैलवमलभ्यं च यत्र शास्त्रं व्रतांतरे ॥ त्याज्यमेवात्र तत्सर्वं शुद्धिहेतुस्त्विहात्मजः। मुद्ग

मृष्टहितासी च विनीतः शांतचेतनः। मुन्यन्तं नीवारः। तथा शातातपः। हैमंतकं सिता स्विन्नं धान्यं मुद्गास्ति

लायवाः। कलायकंगुनीवाराशवास्तुकं पोलमेचिका ॥ षष्टिकाकालशाकं च मूलकं मूलकेतरत्। कंदं सैंध

वसामुद्रे गव्ये च दधिसर्पिषी। पयोऽनुद्धृतसारं च पनसाम्रौ हरीतकी ॥ पिप्पलीजीरकं चैव नागरंगकतिंति

णी। कदलीलवलीधात्रीफलान्यगुडमैक्षवं। अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते। मूलकं हविरं पि

वैलवानां निषिद्धं। तदुक्तं विष्णुयामले। पंचमांसं तथा मद्यं तथा वृंताकमूलके। निवेदयन्ते वत्तेत्र हरिः कीका

ति कीरतीति ॥ ॥ अथ वर्ज्यं ॥ तत्र कुंभसंभवः। लवणं च पलं चैव क्षारं क्षौद्रं रसांतरं। माषमुद्गम

सूराद्यान् कोद्रवान् चणकानपि। पलं मांसं क्षारं लवणमिति संबंधः। मुद्गाः सिताः रसांतरं शुक्तं।

आद्यग्राह्यात गृंजनादिकमपि वर्जनीयमिति। तदुक्तं। स्निग्धं च लवणं मांसं गृंजनं कांस्यभोजनं ॥

रा०

२६

माषाढकीमसूरांश्चकोद्रवांश्चपाकानपि। तांबूलं च द्विर्भुक्तं च दुःसंवासं प्रमत्ततां। वर्जयेदिति शेषः॥
अथ भोजनपर्यायः। तत्र कुंभसंभवः। उपस्तिर्यामिधार्येत्तत्सत्कृत्य प्रोक्षणादिभिः। पावयेद्वैदिकैर्
मंत्रैः पुनर्मूलेन मंत्रवित्। इति वैदिकैः प्रोक्षणादिभिः पावयेदिति संबंधः। मूलेन मंत्रयेदिति शेषः।
तथाह सोमशंभुः। हृदा संभोजयेन्मंत्री पूतैराचामयेज्जलैः। हृदा हृदयमंत्रेण जलं चाभिमंत्रितं पि
बेदिति। पलाशपत्रावल्यामेव भुंजीत नित्यकर्मवित्। कांस्यभाजनी दृनियम इति तत्वं॥ ॥अथ शयनं।
तथा। अथ शयानः शुद्धात्मा जितक्रोधो जितेंद्रियः। तथा नारदपंचरात्रे। भुक्त्वा शयीत शयने सुशु
द्धे च सुशीतले। अर्धरात्रे समुत्थाय पादशौचं भवेद्द्विजः। आचम्य देवं संस्मृत्य शीघ्रं संपूज्य पूर्ववत्।
जपं कुर्याद्यथाशक्ति अर्पयेच्च तथेश्वरे। इति तथा वैशंपायनः। शयनं कुशशय्यायां विन्यसेच्छुचि
वस्त्रधृत्। न दासः क्षालयेन्नित्यं अन्यथा विघ्नमावहेदिति। तथा वायवीयसंहितायां। अहतास्तर

27

पास्तीर्णे सदर्भे शायने शुचिः । मंत्रितेन च शिवं ध्यायन् प्राक्शिरस्को निशि स्वपेत् । शिवमित्युपलक्ष

णं । मंत्रितेनेष्टदेवतामंत्रेण । तथा महाकपिलपंचरात्रे । गुरुपादार्चनं कृत्वा उपवासी जितेंद्रियः । दर्भे

शयानस्ततो रात्रौ दृष्ट्वा स्वप्नं निवेदयेत् । उपवासी उपवासश्च उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह

उपवासः स विज्ञेयः सर्वभोगविवर्जितः । इति स्मृत्युक्तः । तत्र योगिनीतंत्रे । यज्जाग्रतो दूरमुदैतु दैवमाव

र्त्य मंत्रान् प्रयतस्त्रिरेतान् । लघ्वेकभुक् दक्षिणपार्श्वशायी स्वप्नं परीक्षेत यथोपदेशं । मंत्रानिति

बहुवचनेन सकलसूक्तं गृह्यते । तथा । ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन । इष्टानिष्टे समाचक्ष्व

स्व मम सुप्तस्य शाश्वत । एवं स्मृत्वा कुशास्तीर्णे ततः प्रयतमानसः । निशान्ते पशुपतिं स्वप्नं शुभं वा

यदि वाऽशुभं । तथा पिंगलामते । तरा हि लिद्धयं शूलपारये द्धि द्ध ईरितः । स्वप्नमानवमंत्रो यं शंभु

नापरिकीर्तितः । नमो जाय त्रिनेत्राय पिंगलाय महात्मने । वामाय विश्वरूपाय स्वप्नाधिपतये नमः

स्वप्ने कथयमेतथ्यं च सर्वकार्येष्वशेषतः ॥ क्रियासिद्धं विधास्यामि त्वत्प्रसादान्महेश्वर ॥ तथा मंत्रे तंत्रप्र
काशे ॥ ॐ ह्स्क्ल कल्लोकाय विश्वमवेप्रभविष्णवे ॥ विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ स्वप्नमान
वमंत्रोयं कथितो नारदादिभिरिति ॥ ॥ अथ शुभस्वप्नकाः ॥ स्वप्नाः ॥ तत्र योगिनीतंत्रे ॥ त्रिविधं दर्श
नं तस्य यथार्थमयथार्थकं ॥ अपाचकं यत्स्वस्थानां मंयतानां हि दर्शनं ॥ यथार्थंत यथार्थमनस्थानां
विकारजं ॥ अपाचकं मानसं च यथार्थफलमुच्यते ॥ एतेषां स्वरूपमाह यदिति ॥ दर्शनं देवतादीनां विकार
जं पित्तादीनां मानसं मनोविकारजं ॥ तथा आममसिद्धांते ॥ आद्ये वर्षात्वत्सरार्धाद्द्वितीयामे स्वप्नो वर्षपा
दात्तृतीये ॥ मासे पाकः शर्वरीपदतश्चेत्सद्यः पाको गोविसर्जेषु दृष्टः ॥ अद्ये यामे वर्षपाकः फलं एवम
ग्रेपि गोविसर्गे निशांते ॥ तथा क्रूरे च मामध्यमा स्यात् दृष्टे नोत्तमोत्तमे ॥ न विद्यते उत्तमोयं स्यामासि
द्धिरुत्तमे स्वप्ने इत्यर्थः ॥ तानेवाह ॥ स्वप्ने पद्मपतिं वै देवं निचेष्टं सर्वतो मुखं ॥ गुरुं पमा [illegible] समुखं निर्मल

28

चंद्रमंडलं। गंगां गां भारतीं भानुं लिंगिनं लिंगमेश्वरं। प्रसन्नं तत्र जानीयात् सिद्धिं सप्तनिदर्शने। २। प्रसन्नं
निजनाथं। अत एव सिद्धिमपि पंचरात्रे। क्षितिलाभक्षतजाम्बितरणं चाग्निपूजनं। होमश्चाज्वलितेव नौ
संग्रामविजयस्तथा। हंसकोकमयूरादिरथारोहणमेव च। कोकश्चक्रवाक आदीनां सारस आदीयते
सारसरथारोहणमितिवचनात्। तथा कपिलः। कन्यां छत्रं रथं दीपं प्रासादं कमलं नदीं। कुंजरं वृषभं
माल्यं समुद्रं फलितं द्रुमं। पर्वतं चैव हयं मेध्यमामं मांसं सुरासवं। एवमादीनि सर्वाणि दृष्ट्वा सिद्धिमवाप्नु ग म
यात्। तथा स्मृतिः। यथा कर्मसु काम्येषु स्त्रियं स्वप्नेषु दृश्यते। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शी २८
ने। तथा भैरवीतंत्रे। नदीसमुद्रतरणमाकाशगमनं तथा। भास्करोदयनं चैव प्रज्वलंतं हुताशनं। ग्रह
नक्षत्रताराणां चंद्रमंडलदर्शनं। नक्षत्राणि अश्विन्यादीनि। ताराः तदन्याः। हर्म्यस्यारोहणं चैव प्रा
सादशिरसोपि वा। नागाश्ववृषभेंद्राणां तरुशैलाग्ररोहणं। विमानगमनं चैव सिद्धिमंत्रस्य दर्शनं॥

लाभसिद्धितरैश्चैवदेवीनांचैवदर्शनं। एवमादीनि संदृष्ट्वा नरः सिद्धिमवाप्नुयात्। स्वप्नेतुमदिरापानमाम
मांसस्यभक्षणं। क्रिमिविष्ठानुलेपंच रुधिरेणाभिषेचनं। भोजनं दधिभुक्तस्य स्वेतवस्त्रानुलेपनं। सिं
